ॐ
ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskṛta Academy

**Recognised in the UGC-CARE List**

**A National Peer-Reviewed Research Journal**

विश्वविद्यालय–अनुदान–आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**Volume : XIX**
**January to June - 2022**

VEDA SAMSKRTA ACADEMY (R.)
सत्यं ज्ञानमनन्तम्



॥ पातु विश्वं महाबलः ॥ – श्रीक्षेत्र गोकर्ण, कर्नाटक

*Edited by the Dir*
**Dr. Gopalkrishna**
Jyotishashastra-Dharmashast

**VEDA SAMSKRITA ACADEMY (R.)**
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# योगदर्शनमतरीत्या मनः

**Dr. Bhaskar Bhatt Joshi**
Assistant Professor
HOD, Dept. Of Nyaya & Vaisheshika
Karnataka Sanskrit University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Contact No. : 9742269403
E-mail : bhaskarbhat.joshi@ksu.ac.in

आस्तिकदर्शनानां षण्णां परस्परं सारूप्यमस्ति। कणादमुनेः वैशेषिकदर्शनमनुसृत्य गौतममहर्षेः न्यायदर्शनं प्रवर्तते। मनस्तु आन्तरमिन्द्रियं पृथक्पदार्थः, नित्यं च। मनः आत्मगतानां ज्ञानेच्छासुखदुःखानां प्रत्यक्षं जनयति । ज्ञानादिगुणैः सह आत्मस्वरूपमपि मनः गोचरयति । यथा-'अहं सुखी, अहं दुःखी, अहं इदं जानामि, इच्छामि' इत्यादि । ज्ञानादिकं विहाय केवलमहमिति ज्ञानं नोत्पद्यते। तदिदं ज्ञानं मानसप्रत्यक्षमित्युच्यते । चाक्षुषाद्यनुभवजन्यसंस्कारसहकारेण मनः स्मरणात्मकं ज्ञानमपि उत्पादयति । 'सः गजः तत्रासीत्' इत्यादिः स्मरणस्याकारः....। नैयायिकानां मते मनसः द्रव्यत्वमिन्द्रियत्वञ्चास्ति। मनस अणुपरिमाणवत्वात् पृथिव्यप्तेजो-द्रव्याणीव प्रत्यक्षविषयं न भवति । स्पर्शग्राह्योवायुरिवानुमानेनैव मनः ज्ञातुं शक्यते । मनोऽनुमानप्रकारस्तु "युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[1] इत्यस्मिन् सूत्रे निर्दिष्टः । रूपादीनां ज्ञाने यथा चक्षुरादीनीन्द्रियाणि करणानि, तथा सुखदुःखादीनां ज्ञाने करणं मनस इन्द्रियत्वं सिद्ध्यति । अणुपरिमाणवत्त्वात् पृथिव्यादि परमाणुवत् मनः नित्यं भवतीति नैयायिकानामभिप्रायः ।

अन्येन्द्रियापेक्षया मनसः वैशिष्ट्यमस्ति । एतच्च द्रष्टुं स्प्रष्टुं चायोग्यं सत् स्वीयं कार्यं निर्वाहयितुं समर्थं भवति। मनः ज्ञानेन्द्रियगोचरं न भवतीत्यस्य इतरेन्द्रियापेक्षया वैशिष्ट्यम् । न्यायदर्शने आत्मादीनि द्वादशप्रमेयानि [2] निर्दिष्टानि । तेषु षष्ठं मनः भवतीति मनसः प्रमेयत्वम् । मनसः प्रवृत्तिः पुण्यपापयोरुत्पादने कारणं भवति। पापात्मिकां मनोवृत्तिः द्रोहः, परद्रव्यापहरणाभिलाषः, नास्तिकता चेति त्रिविधा। पापात्मिकाम् प्रवृत्तिं त्यक्त्वा पुण्यात्मिकां प्रवृत्तिं कुर्वन् जन इष्टदेवताध्यानादिना अपवर्गरूपं मुख्यं प्रमेयं प्राप्तुं शक्नोति। अत एव मनसः प्रमेयेषु निर्देशः।

कर्मप्रधानं मीमांसादर्शनम् अनुसृत्य ब्रह्मप्रधानं वेदान्तदर्शनं प्रवर्तते पूर्वमीमांसाप्रतिपादितान्येव शब्दन्यायतत्त्वान्याश्रित्य उत्तरमीमांसायां ब्रह्मणो विचारः कृतः। एवमेव कपिलमहर्षिप्रणितं साङ्ख्यदर्शनमनुसृत्य पतञ्जलिना योगदर्शनं निर्मितम्। अत एव साङ्ख्ययोगदर्शनयोः सारूप्यं दृश्यते। उभयोरपि दर्शनयोः विषयसाम्येऽपि कुत्रचिदभिप्रायभेदाः वर्तन्ते। साङ्ख्याः ईश्वरं नाङ्गीकुर्वन्ति। तद्विरुद्धेन पातञ्जलाः ईश्वरस्यास्तित्वं समर्थयन्ति । अत एव योगदर्शनस्य सेश्वरसाङ्ख्यत्वेन व्यवहारः दृश्यते। प्रकृते तु मनसः मध्यमपरिमाणविषये साङ्ख्ययोगदर्शनयोः सिद्धान्तौ परस्परं भिद्येते। साङ्ख्याः मनसः मध्यमपरिमाणवत्वं, पातञ्जलाः विभुपरिमाणवत्वञ्च वदन्ति। मतभेदापेक्षया सारूप्यस्यैवाधिक्यात् साङ्ख्ययोगदर्शनयोः पूर्वमनुसृत्य परस्य प्रवृत्तिरित्यङ्गीकरणीयम्। योगदर्शने बुद्धिः, अहङ्कारः, मन इति त्रिधा विभक्तस्यान्तःकरणस्य चित्तमिति व्यवहारः। एतेषां त्रयाणां क्रियैक्यं विषयैक्यं च वर्तते। अतः योगदर्शने चित्तशब्देन क्वचित् बुद्धिः क्वचिदहङ्कारः, क्वचिच्च मन उच्यते। बुद्ध्यहङ्कारापेक्षया मनस एवाधिकेषु स्थलेषु चित्तशब्देन व्यवहारो दृश्यते। मनः इति वक्तव्ये चित्तमिति, चित्तमिति वक्तव्ये मन इति च योगदर्शने बहुषु स्थलेषु निर्दिष्टत्वात् अत्र मनोनिरूपणप्रस्तावे चित्तविषये ये

1. न्यायदर्शनम्, १/१/६ ।

2. आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्, न्यायदर्शनम्, १/१/९ ।

विषयाः कथिताः त एव प्रदर्श्यन्ते ।योगदर्शने अन्यविषयापेक्षया चित्तस्यैव विपुला चर्चा दृश्यते। महर्षिः पतञ्जलिः योगसूत्रेषु प्रथमे पादे "अथ योगानुशासनम्"[3] इति सूत्रेणोपक्रम्य "योगः चित्तवृत्तिनिरोधः"[4] इति द्वितीयसूत्रेण क्लिष्टाक्लिष्टत्वेन भिन्नानां प्रमाण, विपर्यय, विकल्प, निद्रा, स्मृतीनां पञ्चानां चित्तवृत्तीनां निरोध एवं योग इति प्रपञ्चितवान। सत्वरजस्तमोगुणानां परिणामवशात् चित्तमपि सर्वदा परिणामशीलि, क्षणिकञ्च [5] भवति। तस्मादेव परिणामवशात् याः चित्तवृत्तयः उत्पद्यन्ते, ताः संसारस्य दुःखस्य च कारणानि भवन्ति। योगाभ्यासद्वारा चित्तवृत्तीनां निरोधे सम्पादिते सति निर्मलं मनः मोक्षाख्यं पुरुषार्थं सम्पादयित्तुं साधनं भवति। अतः योगदर्शने चित्तस्य प्राधान्यम्।

**मनस उत्पत्तिः**

सत्वरजस्तमोगुणा एव सर्वस्यापि प्रपञ्चस्य निर्माण कारणं भवन्ति। तस्मादेव गुणत्रयात् महान, तस्मात, रजोगुणप्रधानात् अहङ्कारः उत्पद्यते। तस्मात्सत्वप्रधानादहङ्कारात् श्रोत्र, जिह्वा, त्वक्, घ्राणानि पञ्च बुद्धीन्द्रियाणि उत्पद्यन्ते। रजोगुणप्रधानादहङ्कारात् वाक्, पाणि, पाद, पायु, उपस्थानि पञ्चकर्मेन्द्रियाणि जायन्ते। राजसाहङ्कारसहकृतात् सात्त्विकादहङ्कारात् मन उत्पद्यत [6] इति पातञ्जलानामभिप्रायः।

**चित्तस्य स्वरूपम्**

निर्मलस्य सत्त्वगुणस्य परिणामशून्यमेव चित्तम्। तच्च सत्त्वरजस्तमोगुणकं भवति। तदुक्तं व्यासेन- "चित्तं हि प्रख्या प्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्"[7] इति । चित्तस्य रजस्तमोवृत्त्योर्निरोध एव योगः। सम्प्रज्ञातसमाधौ सात्त्विकीवृत्तिः तिष्ठति, असम्प्रज्ञातसमाधौ तु सर्वासां वृत्तीनां निरोधो जायते। चित्तं स्वत एव सर्वेषामर्थानां ग्रहणे समर्थम्। यदा तु चित्तं तमोगुणेनाव्रियते तदा स्वीयानामर्थानां ग्रहणेऽसमर्थं भवति। तमसः प्रणाशे चित्तं स्वयमेव ध्येयं वस्तु जानाति। चित्तस्यास्यावस्थाविशेषाः पञ्चभूमयस्सन्ति। ताश्च [8] क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धमिति। एताः पञ्चसत्त्वरजस्तमोगुणात्मकस्यैव चित्तस्य भवन्ति। तासु क्षिप्तं रजोगुणस्योद्रेकात् चञ्चलं सुखदुःखादिविषयेषु रजोगुणेन प्रेरितम्। तच्च दैत्यदानवादीनां भवति। मूढं तमोगुणस्योद्रेकात् कार्याकार्यविचक्षणं विना कोपासूयादिभिः दृष्ट्वेव कार्येषु नियमितम्। तच्च रक्षः पिशाचादीनां भवति। विक्षिप्तं सत्त्वगुणस्योद्रेकात दुःखसाधनानि त्यक्त्वा सुखसाधनेष्वेव प्रवृत्तम्। एकाग्रं निरुद्धञ्च सात्विक्यौ अवस्थे भवतः। अतः ते चित्तस्यात्मविषये [9] ।चित्तं पुरुषस्योपभोगे साधनं भवति । यथा अयस्कानमणिः स्वयमेवायः पिण्डं सन्निधीकृत्य शल्यनिष्कर्षणद्वारा पुरुषस्योपकारं कुर्वन् पुरुषस्यैवात्मीयो भवति, तथा चित्तमप्ययः पिण्डसदृशं विषयजाते स्वस्मिन सन्निधीकृत्य पुरुषस्य विषयोपभोगरूपमुपकारं कुर्वत् तस्य स्वं भवति [10] । अतः तत् पुरुषस्य भोगसाधनम्। चित्तवृत्तीनां शान्तसुखदुःकादीनां भोक्तरि पुरुषे भोगसाधनीभूतचित्तद्वारा प्रतिबिम्बात् पुरुषः 'अहं सुखी' 'दुःखी' 'शान्तः' इत्यादिकं ज्ञानं लभत इति योगदर्शने कथितम्।

**चित्तवृत्तयः**

लज्जा तृष्नादयश्चित्तस्यानेका वृत्तयस्सन्ति। तास्सङ्ख्यातुमशक्ताश्च। अतः सौलभ्यार्थमेतासां वृत्तौनां पञ्चभिः प्रकारैस्सङ्क्षेपः

---

3. पातञ्जलयोगसूत्रम्, १/१ ।
4. पातञ्जलयोगसूत्रम्, १/२ ।
5. 'क्षणमपि परिणासून्यं न चित्तं, गुणानां स्वभावतः प्रवृत्तिशीलत्वात्' । नागोजीभ वृत्तिः, ३/१३ ।
6. तन्न सत्त्वस्याङ्गित्वे गुणत्रयादेको महान, तस्मादेकस्मात् रजः प्रधानादहङ्कारः, अहङ्कारात् बुद्धीन्द्रियाणि, राजसात् ।
7. व्यासभाष्यम्, १/१, पृ. सं. ४ ।
8. 'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः' । व्यासभाष्यम्, १/१. पृ.सं.-२ ।
9. व्यासभाष्यम्, १/१, पृ. सं.-३ ।
10. चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वयं भवति पुरुषस्य स्वामिनः । व्यासभाष्यम्, १/४, पृ. सं.-८ ।

कृतः। तासामेव वृत्तीनां निरोधो योगो भवतीति वृत्तीनां विवरणमत्र दीयते। चित्तवृत्तयः क्लिष्टाः, अक्लिष्टाश्च भवन्ति। रागद्वेषादीनां क्लेशानां हेतवः क्लिष्टाः एतासां वृत्तीनां बन्ध एव फलम् । क्लेशानां नाशकाः अक्लिष्टाः वृत्तयः। एतासां तु मुक्तिः फलम्[11]। इत्थं क्लिष्टाक्लिष्टत्वेन भिन्नाश्चित्तवृत्तयः प्रमाणविपर्यय विकल्पनिद्रास्मृतयश्चेति[12] पञ्च भवन्ति। एताः चित्तस्यैव परिनामविशेषाः। एतासां वृत्तीनां पुनरवान्तरभेदास्सन्ति। वृत्तीनां स्वरूपमत्र सङ्क्षेपेण विचारयामः।

**मनः प्राणयोस्सम्बन्धः**

मनसः प्राणस्य च सम्बन्धोऽस्तीत्यत एव प्राणायामेन मनोनिरोधं कर्तुं शक्यते। कौष्ठस्य प्राणवयोः प्रच्छर्दनविधारणाभ्यां मनसः प्रसादात् तस्य स्थिरता लभ्यते। प्रच्छर्दनं नाम शरीरान्तर्गतस्य वायोः द्वात्रिंशन्मात्राप्रमाणेन शनैः शनैः पिङ्गलनाडीद्वारा बहिर्वमनम्[13]। अयं रेचकप्राणायाम इति उच्यते। विधारणन्तु कोष्ठे पूरितस्य वायोः चतुष्षष्ठिमात्राप्रमाणेन बहिर्गमननिरोधः[14]। अयं कुम्भकप्राणायाम इत्युच्यते। एतयोः रेचक कुम्भकयोः प्राणायामयोर्मध्ये पूरकप्राणायामोप्यवश्यं भवति। रेचकप्राणायामेन बहिर्गतं वायुं इडानाडीमार्गेण षोडशमात्राप्रमाणे अन्तरापूरणं पूरकप्राणायाम इति उच्यते। रेचकानन्तरं पूरकं विना विधारणरूपस्य कुम्भकस्यासम्भवात्। एतेन त्रिविधेन प्राणायामेन प्राणस्पन्दो निरुध्यते। तथा सति चित्तगतानां दोषाणां नाशस्सम्पद्यते। मनः प्राणयोः सहभावित्वमस्ति। अत एव प्राणप्रवृत्तिमूलकः सर्वेन्द्रियाणां वृत्तयो भवन्ति। प्राणानां निरोधेन इन्द्रियवृत्तिनिरोधोऽपि जायते। प्राणनिग्रहे मनोऽपि निगृह्यते। वसिष्ठवचनमत्र प्रमाणम्- यथा "यः प्राणपवनस्पन्दः चित्तस्पन्दः स एव हि"[15] एवञ्च प्रच्छर्दनविदारणाभ्यां प्राणनिग्रहे सम्पादिते सति चित्तमलनां नाशात् चित्तं प्रसन्नं सत् एकाग्रतां लभते।

**चित्तपरिकर्मः**

विषयाणां गन्धरसरूपस्पर्शशब्दानां दिव्यानां साक्षात्कारोऽपि चित्तस्य स्थिरतां कल्पयति। अनेन चित्तस्य विषयैस्साकं सम्बन्धोऽनुमीयते। योगशास्त्रे निर्दिष्टेन प्रकारेण नासाग्रे मनसो धारणात् दिव्यगन्धसाक्षात्कारो जायते। तथैव मनसः जिह्वाग्रे धारणात् दिव्यरससाक्षात्कारः। ताल्वग्रे मनोधारणेन दिव्यरूपसाक्षात्कारः। जिह्वामध्ये चित्तस्य धारणेन दिव्यस्पर्शसाक्षात्कारः, जिह्वामूले चित्तस्य धारणेन दिव्यशब्दसाक्षात्कारश्च जायते। एते साक्षात्काराः शीघ्रमुत्पन्नाः 'योगस्य फलमस्तीति' योगिनो विश्वासमुत्पाद्य मनसः स्थितिं सम्पादयन्ति। एवमेवाष्टदलं हृदयपद्मम् ऊर्ध्वमुखं ध्यात्वा तस्य कर्णिकायां वर्तमानायां सुषुम्नानाड्यामूर्ध्वमुख्यां संयमकरणात् मनसः संविद्भवति। तच्च मनः सूर्येन्दुग्रहमणीना यादृश्यः प्रभाः तद्रूपेणानेकविधं भवति। तदेव सात्त्विकं ज्योतिः। तस्यापि ज्योतिः स्वरूपस्य संयमात् मनोऽहङ्काराख्या ज्योतिष्मती विगतशोका च प्रवृत्तिः उत्पन्ना सती मनसो स्त्यैर्यहेतुर्भवतीति मणिप्रभायां[16] कथितम् वीतरागिणां कृष्णद्वैपायनादीनां यादृशं चित्तं, तादृशस्य चित्तस्य ध्यानादपि योगिनश्चित्तं स्थिरतामाप्नोति।

स्वप्ने भगवतः आराधनं कुर्वन प्रबुद्धः योगी तमेव विषयं भावयेत्। तादृश्या भावनयाऽपि चित्तं स्थितिपदमाप्नोतीति वाचस्पतिः[17]। स्वाभिमतस्य पदार्थस्य ध्यानादपि चित्तस्य स्थैर्यमायाति[18]। एवं चित्तस्य स्थिरतासंपादने अनेके उपायाः योगदर्शने प्रदर्शिताः।

---

11. 'रागद्वेषक्लेशानां हेतवः क्लिष्टाः बन्धफलाः । अक्लिष्टाः क्लेशनाशिन्यो मुक्तिफला" – मणिप्रभा, १/५ ।
12. 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' पातञ्जलयोगसूत्रम्, १/६ ।
13. प्राणस्य शरीरान्तर्गतस्य वायोः प्रच्छर्दनं द्वात्रिंशन्मात्रा प्रमाणेन शनैः शनैः पिङ्गलया बहिर्विरचनम् । योगसुधाकरः, १/३४ ।
14. रेचितं पश्चात् इडया षोडशमात्रप्रमाणेनान्तरापूर्य पूरितस्य पुनश्चतुष्षष्ठिमात्रा प्रमाणेन विधारणमान्तरकुम्भकः । योगसुधाकरः, १/३४ ।
15. योगवासिष्ठम्, पृ. सं.- ८६ ।
16. मणिप्रभा, १/३६ ।
17. वाचस्पति टीका, १/३८, पृ. सं.- ४१ ।
18. 'यथाभिमतध्यानाद् वा' योगसूत्रम्, १/३९ ।

एतदेव चित्तपरिकर्मेत्युचते। परिकर्म प्रसादनं इत्युक्तत्वात् चित्तप्रसादनमेव परिकर्मशब्दस्यार्थोऽवगन्तव्यः।

**चित्तस्थैर्यस्य फलम्**

पूर्वोक्तैरुपायैः चित्तस्य स्थैर्य सम्पादितवतो योगिनः सूक्ष्मविषये चित्तस्य निवेशनद्वारा तस्य परमाण्वन्तो वशीकारः अप्रतिहतरूपेण जायते । एवञ्च परमाणुपर्यन्ते सूक्ष्मे विषये योगिनो मनः न प्रतिहन्यते । तथा स्थूलविषयं आकाशादि परममहत्पर्यन्तं भावयतः चित्तस्य कुत्राऽपि प्रतिघातो नोत्पद्यते [19]। एवं समस्तविषयाणां वशीकारेण योगनिश्चित्तं परिपूर्णं भवति । परिपूर्णस्य च मनसः पुनः पुनः स्थैर्यसम्पादनार्थं प्रयत्नो नापेक्षितः[20], तस्य चाञ्चल्याभावात् इति व्यासभाष्ये निर्दिष्टम्। स्वत एव चित्तस्य एवं स्थिरतासम्पादनेन वृत्तिरहितस्य चित्तस्य ग्रहीतग्रहणग्राह्येषु एकाग्रता तद्रूपपरिणामश्च भवति सर्वार्थग्रहणे समर्थस्य विषयान्तरव्यासङ्गरूपाणां दोषाणामपगमे ग्रहीत्रादीषु ध्येयेषु साक्षात्काररूपा समापत्तिः। स्वत एव भवतीति नागोजीभट्टेन [21] कथितम। निर्मलः स्फटिकमणिः यथा......

**मनसो वेगः**

'ततो मनोजवित्वं विकरणभावः प्रधानजयश्च' इत्यस्मिन् सूत्रे मनसो वेगः पतञ्जलिना निरूपित । अतिदूरे वर्तमानमपि प्रदेशं मनः अतिशीघ्रं गच्छति। तस्य वेग: ईदृश इति वक्तुं न शक्यते । मनसो वेग अस्माभिरप्यनुभूत एव । एकस्मिन् प्रदेशे वर्तमानो जनः विदेशे स्थितं जनं झटित्येव स्मरति । तत्र तु मनोवेग एव कारणम् ।

**मनसः परिमाणम्**

पातञ्जलानां मते मनः अणु परिमाणयुक्तं भवति । अस्मिन् विषये सांख्यानाम् पातञ्जलानां च मतभेदो दृश्यते । मनः मध्यमपरिमानविशिष्टमिति वदतां सांख्यानां मतमत्र निराकृत्य व्यासेन स्वीये पातञ्जलयोगसूत्रभाष्ये मनसः अणुत्वं प्रतिपादितम् ।

**मनसः इन्द्रियत्वम्**

पातञ्जलाः मनसः इन्द्रियत्वमङ्गीकुर्वन्ति। तेषां मते त्वक् चक्षुर्जिह्वा घ्राण श्रोत्राणि पञ्च ज्ञानेन्द्रियाणि। वाक् पाणि पाद पायु उपस्थानि पञ्च कर्मेन्द्रियाणि। एकादशेन्द्रियं मनः, एवमेकाशेन्द्रियाणि वर्तन्ते। मनः ज्ञानकर्मेन्द्रियेभ्यः प्रधानम्। मनः नायक इवान्यानि इन्द्रियाणि स्वस्वविषयेषु प्रेरयति। अतः मनः ज्ञानकर्मोभयात्मकं सर्वार्थञ्च [22] भवतीति व्यासभाष्ये कथितम्। योगी यदा स्वीयं चित्तं स्वशरीरान्निष्कास्य शरीरान्तरेषु निक्षिपति तदा दशज्ञानकर्मेन्द्रियाणि चित्तमनुसृत्य गच्छन्ति।

अस्मिन् विषये व्यासेन दृष्तान्तः प्रदर्शितः यथा मधुकरराजानं उत्पतन्तं मक्षिका अनुत्पतन्ति, निविशमान मनुनिविशन्ते तथा इन्द्रियाणि चित्तस्य परशरीरावेशेऽनुसृत्य गच्छन्ति [23] इति चित्तं विना इन्द्रियाणि स्वं स्वं व्यापारं कर्तुमसमर्थानि भवन्तीति सर्वेष्विन्द्रियेषु मनसः प्राधान्यं सिद्धम् ।

**मनोनाशः**

योगदर्शने तत्र तत्र मनोनाश चित्तलयः इत्यादीनि पदानि दृश्यन्ते। अत्र मनोनाशो नाम मनस्सम्पूर्णतया नाश इत्यर्थो न वक्तव्यः । सत्वादीनां गुणाना संसर्गेणोत्पद्यमानानां विविधानां चित्तवृत्तीनां योगाभ्यासेन निरोध सम्पादिते सति प्रसन्नं चित्तम स्वकारणे

---

19. भोजवृत्तिः, १/४० ।

20. तद्वशीकारात् परिपूर्णयोगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षते । व्यासभाष्यम्, १/४०, पृ. सं.- ४३ ।

21. नागोजिभट्ट वृत्तिः, १/४० ।

22. श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणानि बुद्धीन्द्रियाणि, वाक् पाणिपादपायूपस्थानि कर्मेन्द्रियाणि, एकादशं मनः सर्वार्थम् । व्यासभाष्यम्, २/१९ ।

23. यथा मधुकरराजानं मक्षिकाउत्पतन्तमनूत्पतन्ति, निविशमानमनुविनिशन्ते तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्ते । व्यासभाष्यम्, ३/१८, पृ. सं.-१४३ ।

लीयते। तदा मनः निर्वृत्तिकं सत कैवल्याय कल्पते। पातञ्जलाना मते मनसः नित्यत्वात् तस्य सम्पूर्णतया नाशो न सम्भवति। वासनानामपि नित्यत्वात् तासामाश्रयभूतस्य मनसो नित्यत्वमेवेति तस्य नाशो न युज्यत इत्यवधारणीयम् ।

**योगिनः अनेकचित्तत्वम्**

"निर्माणचित्तान्यस्मितामात्राम"[24] इति सूत्रादेवं ज्ञायते- पुरुषः योगसिद्ध्या बहूनि शरीराणि स्रष्टुं प्रभवति। तदा असंख्येषु तेषु शरीरेषु असंख्याकानि चित्तान्यपि उत्पद्यन्ते। अस्मितारूपोऽहङ्कारश्चित्तस्योपादानकारणं भवति। तस्मादेवाहङ्कारादनेकानि चित्तानि निर्मीयन्त इति एतेषां निर्माणचित्तानिति व्यवहारः योगदर्शने दृश्यते। यावन्ति योगिनो शरीराणि तावन्ति चित्तानि उत्पद्यन्ते। अग्नेर्विस्फुलिङ्गा इव चित्तानि जायन्त [25] इति चन्द्रिकाकारो वदति । यथा विविधानां पुरुषाणां चित्तेषु भिन्नभिन्ना अभिप्रायाः भवन्ति, तथा नात्रानेकेषु चित्तेषु दृश्यन्ते। तत्र कारणन्तु पतञ्जलिनैवं कथितम्- "प्रवृत्तिभेदे प्रयोजक चित्तमेकमनेकेषाम"[26] इति। एतेषां भिन्नानां चित्तानां प्रयोजक प्रधान चित्तमेकं योगी निर्मिमीते। तस्यैव प्रधानचित्तस्यानुसार अपरेषां सर्वेषामपि चित्तानां प्रवृत्तिर्नियमिता [27] भवतीति व्यासभाष्ये कथितमस्ति। अस्मिन्नेव प्रस्तावे नागोजीभान महाराजः यथा अनेकानपि पुरुषान् स्वाधी वर्तमानान् स्वाभिप्रायानुसारं प्रवर्तयति तथा प्रधानं चित्तमेकमेवान्यानि चित्तानि प्रवर्तयतीति [28] दृष्टान्तः प्रदर्शितः। योगिनश्चित्तमेवैतेषां अनेकेषां चित्तानामधिष्ठातृत्वेन वर्तमानं सत् तानि प्रेरयतीति भोजवृत्तौ प्रतिपादितम्। यथा एकं चित्तं आत्मीयशरीरे स्थितानां चक्षुःपाण्यादीनां प्रेरकं भवति, तथा सर्वचित्ताधिष्ठातृत्वेन योगिचित्तमेव शरीरान्तरेष्वपि इतराणि चित्तानि प्रेरयतीति भोजाभिप्रायः [29] योगसिद्ध्यैव योगी अनेकानि चित्तानि निर्मातुं प्रभवतीति कथितम्। सिद्धयः जन्म, औषधि, मन्त्र, तपः समाधिजन्यभेदात् पञ्चविधाः भवन्ति। एताभ्या एव सिद्धिभ्यः निर्मितानि चितानि पञ्चविधानि भवन्ति। तेषु ध्यानरूपेण समाधिना संस्कृतं यच्चित्तं तदेव मोक्षयोग्यं भवति। समाधिना योगद्वारा अखिलानां वासनानां निर्मूलनं भवतीति समाधिसंस्कृतम् अपि चित्तं रागादिवासनारहितं भवति। रागादीनामभावे पुण्यपापयोस्सम्बन्धो न भवतीति, तदेकमेवचित्तं [30] मोक्षयोग्यमिति ज्ञातव्यम्।

**************

24. योगसूत्रम्, ४/४ ।
25. योगिनः स्वयं निर्मितेषु कार्येषु यानि चित्तानि तानि मूलकारणादस्मितमात्रात् प्रसरन्ति अग्नेः विस्फुलिङ्गा इव । चन्द्रिका, ४/४ ।
26. योगसूत्रम्, ४/५ ।
27. चित्तानां कथमेकचित्ताभिप्रापुरःसारा प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चित्तमेकं निर्मिमीते । ततः प्रवृत्तिभेदः ।
    व्यासभाष्यम्, ४/५, पृ. सं.-१६० ।
28. महाराज इव दशाधिकरणमेकं तादृशाधिकरणमपरम् । नागोजीभवृत्तिः, ४/५ ।
29. तेषामनेकेषां चेतसां प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं प्रेरकमधिष्ठातृत्वेन । तेन न भिन्नमतत्वम् ।
    अयमर्थः- यथात्मीये शरीरे मनः चक्षुः पाण्यादीनि यथेच्छं प्रेरयति अधिष्ठातृत्वेन तथा कायान्तरेष्वपि । भोजवृत्तिः, ४/५ ।
30. तत्र ध्यानमनाशकम्, योगसूत्रम्, ४/६ ।